# Brahmavid-Ashirvada

# બ્રહ્મવિદાશીર્વાદઃ

## Document Information

Text title : brahmavidAshIrvAdaH

File name : brahmavidashirvada.itx

Category : major_works, vidyAraNya

Location : doc_z_misc_major_works

Author : Sw. Vidyaranya

Transliterated by : Lakshmi Muthuswamy

Proofread by : Lakshmi Muthuswamy, Sunder Hattangadi

Latest update : Feb 4, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# બ્રહ્મવિદાશીર્વાદઃ

॥ શ્રીઃ ॥

શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય
શ્રીવિદ્યારણ્યસ્વામીવિરચિતઃ
શ્રીબ્રહ્મવિદાશીર્વાદઃ ।
હિરણ્યગર્ભાદિસ્થાવરાન્તેષુ શરીરેષુ યદેકં ચૈતન્યમસ્તિ,
તદેવાહમસ્મીતિ દૃઢજ્ઞાનં નિરન્તરં ભૂયાત્ ॥૧ ॥

નિર્વિકલ્પસમાધિપ્રતિબન્ધકલયવિક્ષેપકષાયરસાસ્વાદેભ્યો
રક્ષિતં મે ચિત્તમવિઘ્નેન બ્રહ્મણિ અવસ્થિતં ભૂયાત્ ॥ ૨ ॥

નિત્યનિર્વિકારાસઙ્ગાદ્વિતીયપરિપૂર્ણસચ્ચિદાનન્દસ્વપ્રકાશ-
ચિદેકરસબ્રહ્માનુભવસિદ્ધિર્ભૂયાત્ ॥ ૩ ॥

અહમાદિદૃશ્યવિલક્ષણાસ્મત્પ્રત્યયાલમ્બનભૃતપ્રત્યક્-
ચિન્માત્રસ્વરૂપાનુભવસિદ્ધિર્ભૂયાત્ ॥ ૪ ॥

સજાતીયવિજાતીયસ્વગતભેદરહિતાખણ્ડસચ્ચિદાનન્દાદ્વિતીય-
બ્રહ્માત્માનુભવસિદ્ધિર્ભૂયાત્ ॥ ૫ ॥

નિત્યશુદ્ધબુદ્ધમુક્તસત્યપરમાનન્દાદ્વિતીય-
બ્રહ્માત્માનુભવસિદ્ધિર્ભૂયાત્ ॥ ૬ ॥

સ્વગતાદિભેદરહિતાખણ્ડસચ્ચિદાનન્દલક્ષણબ્રહ્માભિન્ન-
કૂટસ્થપ્રત્યક્સ્વરૂપઃ સર્વસાક્ષીતિ ચિદ્રૂપાનુભવસિદ્ધિર્ભૂયાત્ ॥૭ ॥

સ્વાત્મનોઽન્યત્વેન પ્રતિભાતં સકલં સાક્ષ્યં જગત્ સ્વાવિદ્યાવિલસિતત્વેન
સ્વાનન્યત્વાત્ સ્વાત્મમાત્રમિતિ, અદ્વિતીયબ્રહ્માત્માનુભવસિદ્ધિર્ભૂયાત્ ॥ ૮ ॥

અસંભાવનાવિપરીતભાવનારહિતત્વેન કરતલામલકવત્ અહં બ્રહ્માસ્મીતિ
અપ્રતિબદ્ધાપરોક્ષબ્રહ્મસાક્ષાત્કારો દૃઢીભૂયાત્ ॥ ૯ ॥

યો બ્રહ્માદિસ્તમ્બપર્યન્તાનાં સર્વેષાં પ્રાણિનાં દેહમધ્યે,
તત્તદ્દેહસાક્ષિત્વેન ભાસમાનઃ, પરિપૂર્ણાત્માઽસ્તિ, સોઽયં પરમાત્મા,
કેવલં મુમુક્ષોઃ પુરુષસ્ય મે સ્વરૂપમિત્યેવંરૂપાત્મસાક્ષાત્કારો
દૃઢીભૂયાત્ ॥ ૧૦ ॥

વાસનાક્ષય - મનોનાશ - તત્ત્વજ્ઞાનાભ્યાસવશાત્, જ્ઞાનરક્ષા,
તપઃસિદ્ધિઃ, સર્વસમત્વં, દુઃખનિવૃત્તિઃ, સુખાવિર્ભાવઃ
ઇત્યેતત્પઞ્ચપ્રયોજનસિદ્ધિર્ભૂયાત્ ॥ ૧૧ ॥

મૈત્રી - કરુણા - મુદિતોપેક્ષારૂપસદ્વાસનાપાટવેન રાગાદિ-
દુર્વાસનાક્ષયઃ સમ્યગ્ભૂયાત્ ॥ ૧૨ ॥

નિરન્તરસ્વાત્માનુસન્ધાનવશાત્ મનસો વૃત્તિરૂપપરિણામત્યાગેન,
નિરુદ્ધતાકારેણ આત્મપરિણામો દૃઢીભૂયાત્ ॥ ૧૩ ॥

શમાદિપૂર્વકશ્રવણમનનનિદિધ્યાસનાભ્યાસબલાત્,
વિષયાસક્તિઃ, પ્રજ્ઞામાન્દ્યં, વિપર્યયઃ, દુરાગ્રહશ્ચેતિ
વર્તમાનપ્રતિબન્ધચતુષ્ટયનિવૃત્તિદ્વારા,
અપ્રતિબદ્ધાપરોક્ષબ્રહ્મસાક્ષાત્કારો દૃઢીભૂયાત્ ॥ ૧૪ ॥

ઉપક્રમાદિષડ્વિધલિઙ્ગૈઃ, અશેષવેદાન્તાનામ્
અદ્વૈતે બ્રહ્મણિ તાત્પર્યાવધારણં દૃઢીભૂયાત્ ॥ ૧૫ ॥

શ્રીગુરુમુખાત્ શ્રુતાદ્વિતીયવસ્તુનઃ, વેદાન્તાનુગુણયુક્તિભિઃ
અનવરતમનુચિન્તનં ભૂયાત્ ॥ ૧૬ ॥

વિજાતીયદેહાદિપ્રત્યયાનન્તરિત - સજાતીયસચ્ચિદાનન્દાત્મ-
પ્રત્યયપ્રવાહો નિરન્તરં ભૂયાત્ ॥ ૧૭ ॥

અસઙ્ગોઽહં, ચિદાત્માહમિતિ પ્રત્યગાત્મનિ નિવેશિતે, વૃત્તિરહિતે,
સંસ્કારશેષમાત્રતયા સૂક્ષ્મરૂપેણાવસ્થિતે ચિત્તે, આત્મનઃ
સ્વરૂપભૂતપરમાનન્દો નિરન્તરં સમ્યગાવિર્ભૂયાત્ ॥ ૧૮ ॥

અહમાત્મા સાક્ષી, કેવલઃ, ચિન્માત્રસ્વરૂપઃ; નાજ્ઞાનં; નાપિ
તત્કાર્યં ; કિંતુ, નિત્યશુદ્ધબુદ્ધમુક્તસત્યપરમાનન્દાદ્વયં
બ્રહ્મૈવાહમસ્મીતિ અભેદેનાવસ્થાનં સમાધિઃ ; તત્ર ચ અન્તસ્સમાધિના
દૃગ્દૃશ્યવિવેકે, બહિસ્સમાધિના બ્રહ્મસર્ગવિવેકે ચ દૃઢે જાતે,
તેન વિવેકદ્વયેનાયં ગલિતદેહાભિમાનઃ,

વિજ્ઞાતપરમાત્મતત્ત્વશ્ચ ભૂયાત્ ॥ ૧૯ ॥

દેહાદ્બહિઃ સકલનામરૂપાત્મકેષુ વસ્તુષ્વપિ, સર્પધારાદિષુ
રજ્જુરિવ વ્યાપ્તઃ, સચ્ચિદાનન્દલક્ષણો યઃ પરમાત્મા, સ એવ
પરશબ્દેનોચ્યતે । અન્તઃ અહમાદિદૃશ્યવિલક્ષણઃ,
અસ્મત્પ્રત્યયાલમ્બનભૂતઃ, પ્રત્યક્ચિન્માત્રસ્વરૂપઃ, યઃ
સાક્ષ્યાખ્યો જીવાત્મા, સ એવ અવરશબ્દેનોચ્યતે । પરશ્ચાસૌ
અવરશ્ચેતિ પરાવરઃ, પ્રત્યગભિન્નઃ પરમાત્મા । તસ્મિન્ એવમ્
અન્તર્બહિશ્ચ પરરૂપેણ અવરરૂપેણ ચ અવસ્થિતે, પરમાર્થતઃ
પરાવરવિભાગરહિતે પ્રત્યગભિન્ને પરાવરે બ્રહ્મણિ ' ત્વં વા
અહમસ્મિ ભગવો દેવતે ; અહં વૈ ત્વમસિ ' ઇતિ શ્રુત્યનુસારેણ
' અહં બ્રહ્માસ્મિ, બ્રહ્મૈવાહમસ્મિ ' ઇતિ વ્યતિહારેણ,
અખણ્ડૈકરસત્વેન સાક્ષાત્કૃતે સતિ, તેન પરાવરબ્રહ્મસાક્ષાત્કારેણ,
અસ્ય પરાવરબ્રહ્મ સાક્ષાત્કૃતવતો મમ હૃદયગ્રન્થિભેદ - સર્વ -
સંશયનિવૃત્તિ - સર્વકર્મક્ષયરૂપપરમપુરુષાર્થઃ
સમ્યગાવિર્ભૂયાત્ ॥ ૨૦ ॥

અહઙ્કારાત્મનોઃ એકત્વભ્રમનિવૃત્તિરૂપોઽયં
ગ્રન્થિભેદઃ દૃઢીભૂયાત્ ॥ ૨૧ ॥

આત્મા દેહાદિવ્યતિરિક્તો વા ન વા, વ્યતિરિક્તત્વેઽપિ, કર્તૃત્વાદિધર્મયોગી
વા ન વા, અકર્તૃત્વેઽપિ, તસ્ય બ્રહ્મણા ભેદોઽસ્તિ વા ન વા, અભેદેપિ,
તજ્જ્ઞાનં કર્માદિસહિતં વ મુક્તિસાધનં કેવલં વા, તથાપિ, આત્મા
સાક્ષી વા કર્તા વા, સાક્ષિત્વેપિ અસ્ય બ્રહ્મસ્ત્વમસ્તિ વા ન વા, બ્રહ્મત્વે
સત્યપિ, તદ્બુધ્યા વેદિતું શક્યતે વા ન વા, શક્યત્વેઽપિ,
તદ્વેદનમાત્રેણ મુક્તિરસ્તિ વા ન વા, સાક્ષાત્કૃતેઽપિ, ઇતઃ પરં
કર્તવ્યમસ્તિ વા ન વા, કર્તવ્યાભાવેઽપિ, ઇદાનીં મમ જીવન્મુક્તિરસ્તિ વા
ન વા, જીવન્મુક્ત્વેઽપિ, વર્તમાનદેહપાતાન્તરં વિદેહમુક્તિઃ
ભવિષ્યતિ વા ન Vવા, તત્પ્રાપ્તાવાપિ, કાલાન્તરે પુનર્જન્મ ભવિષ્યતિ
વા ન વા, ઇત્યાદિ સર્વસંશયનિર્વૃત્તિર્ભૂયાત્ ॥ ૨૨ ॥

અનારબ્ધાનાં આગામિજન્મહેતૂનાં અનેકકોટિજન્માર્જિતાનાં
પ્રારબ્ધવ્યતિરિક્તાનાં સઞ્ચિતકર્મણાં નિવૃત્તિરૂપઃ
પરમપુરુષાર્થઃ સમ્યગાવિર્ભૂયાત્ ॥ ૨૩ ॥

યઃ પૂર્ણાનન્દૈકબોધઃ તદ્બ્રહ્માહમસ્મીતિ બ્રહ્માત્માનુભવ-
માત્રપર્યવસાને બુદ્ધિર્નિરન્તરં ભૂયાત્ ॥ ૨૪ ॥

યસ્મિન્ કાલે દ્વૈતભાનં નાસ્તિ, નિદ્રાઽપિ નાગચ્છતિ, તસ્મિન્
કાલે ઉપલભ્યમાનં યત્સુખમસ્તિ સ બ્રહ્માનન્દ ઇતિ
બ્રહ્માત્માનુભવસિદ્ધિઃ નિરન્તરં ભૂયાત્ ॥ ૨૫ ॥

મનોવ્યાપારાભાવસમયે યત્સુખં ભાસતે, તત્
સુખમાત્મસ્વરૂપમિતિ આત્મનિશ્ચયઃ સમ્યગ્ભૂયાત્ ॥ ૨૬ ॥

સ્વપ્નઃ સ્વાતિરેકેણ યથા નાસ્તિ, તથૈવ સ્વજાગ્રદપિ સ્વાતિરેકેણ
નાસ્તિ ; તેન અદ્વિતીયાત્માનુભવસિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૨૭ ॥

વાસનાક્ષયમનોનાશાભ્યાં નિર્વાસને વૃત્તિશૂન્યે ચિત્તે,
સંશયવિપર્યયદોષદ્વયાભાવેન ઉત્પન્નં બ્રહ્મજ્ઞાનં
અબાધિતત્વેન સુરક્ષિતં ભૂયાત્ ॥ ૨૮ ॥

પઞ્ચમ્યાદિભૂમિત્રયરૂપાયાં જીવન્મુક્તૌ સમ્પાદ્યમાનાયાં
દ્વૈતભાનાભાવેન સંશયવિપર્યયપ્રસઙ્ગાભાવાત્
ઉત્પન્નં તત્ત્વજ્ઞાનં અબાધિતત્વેન સુરક્ષિતં ભૂયાત્ ॥ ૨૯ ॥

સ્વપ્ને સ્થૂલશરીરાભાવેઽપિ, સુષુપ્તૌ સૂક્ષ્મશરીરાભાવેઽપિ,
સમાધૌ કારણશરીરાભાવેઽપિ, જાગ્રદાદ્યવસ્થાચતુષ્ટયેઽપિ
યઃ ચિદ્રૂપાત્મા મણિષુ સૂત્રમિવ અનુસ્યૂતતયા નિરન્તરં ભાસતે,
સ ચિદ્રૂપાત્મૈવ અહમસ્મીતિ અન્વયવ્યતિરેકાભ્યાં
શરીરત્રયવ્યાવૃત્તિં તત્સાક્ષિચૈતન્યસ્યાનુવૃત્તિં ચ પશ્યતો
મમ શરીરત્રયવ્યતિરિક્તાત્માનુભવઃ સમ્યગ્ભૂયાત્ ॥ ૩૦ ॥

ભગવન્તં પરમેશ્વરં પ્રીતિપૂર્વકં ભજતો મમોપરિ
અનુગ્રહાર્થં ભગવાન્ વાસુદેવઃ આત્મભાવસ્થઃ સન્ ,
વિવેકપ્રત્યયરૂપેણ, ભક્તિપ્રસાદસ્નેહયુક્તેન,
તદ્ભાવનાભિનિવેશવાતેરિતેન, બ્રહ્મચર્યાદિસાધન-
સંસ્કારવત્પ્રજ્ઞાવર્તિના, વિરક્તાન્તઃકરણાધારેણ,
વિષયવ્યાવૃત્તરાગદ્વેષકલુષિતચિત્તનિવાતાપવરકસ્થેન,
નિત્યપ્રવૃત્તૈકાગ્ર્યધ્યાનજનિતસમ્યગ્દર્શનભાસ્વતા
જ્ઞાનદીપેન અજ્ઞાનજં અવિવેકતો જાતં મિથ્યાપ્રત્યયરૂપં
મોહાન્ધકારં તમો નાશયત્વિત્યાશીઃ નિરન્તરં ભૂયાત્ ॥ ૩૧ ॥

પરમેશ્વરં પ્રીતિપૂર્વકં ભજન્તો ભક્તા યેનાનન્યબુદ્ધિયોગેન સમ્યગ્દર્શનલક્ષણેન ભગવન્તં પરમેશ્વરં આત્મત્વેન ઉપયાન્તિ પ્રતિપદ્યન્તે, તં બુદ્ધિયોગં ભગવાન્ વાસુદેવઃ મે દદાતુ ઇતિ આશીર્નિરન્તરં ભૂયાત્ ॥ ૩૨ ॥

વિકારમન્તરેણ સ્વાધ્યસ્તં સર્વં સાક્ષાદવ્યવધાનેન સ્વરૂપબોધેન ઈક્ષતે પશ્યતીતિ સાક્ષ્યનુભવસિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૩૩ ॥

દેહેન્દ્રિયાદિસકલજડાવભાસકત્વેન આત્મા ચિદ્રૂપ ઇતિ ચિદાત્માનુભવસિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૩૪ ॥

આત્મનિ કદાચિદપિ અપ્રિયાભાવેન,પરમપ્રેમાસ્પદત્વેન ચ, આત્મા પરમાનન્દરૂપ ઇતિ, આનન્દાનુભવસિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૩૫ ॥

અભારૂપસ્ય વિશ્વસ્ય ભાનં, ભાસકસન્નિધિં વિના કદાચિદપિ ન સંભવતીતિ, ભારૂપાત્મા સર્વગત ઇતિ સર્વગતાત્માનુભવસિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૩૬ ॥

અસજ્જડદુઃખાત્મકાહઙ્કારાદિભ્યો વિલક્ષણતયા, પ્રાતિકૂલ્યેન સત્યજ્ઞાનાનન્દરૂપેણ અઞ્ચતિ, પ્રકાશત ઇતિ, પ્રત્યગાત્માનુભવ-સિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૩૭ ॥

પશ્ચાદ્ભાસમાનસ્ય જડસ્ય, પ્રથમતો ભાસમાનં ચૈતન્યમેવ વાસ્તવં સ્વરૂપમિતિ નિશ્ચિત્ય, જડમુપેક્ષ્ય, ચિન્માત્રમેવ ચિત્તં નિરન્તરં સમ્યગ્ભૂયાત્ ॥ ૩૮ ॥

' સર્વાણ્યેવૈતાનિ પ્રજ્ઞાનસ્ય નામધેયાનિ ભવન્તિ ' ઇતિ વાક્યેન દેહેન્દ્રિયાદિસાક્ષિરૂપં યત્ પ્રજ્ઞાનં ત્વંપદાર્થરૂપં નિર્ણીતં, તદેવ ' એષ બ્રહ્મ ' ઇત્યાદિવાક્યેન જગત્કારણતયા નિર્ણીતં પરં બ્રહ્મ, ન ચાનયોરીષદપિ ભેદોઽસ્તિ ઇતિ, ઐતરેયમહાવાક્યજ્ઞાનસિદ્ધિઃ નિરન્તરં ભૂયાત્ ॥ ૩૯ ॥

યતઃ, સર્વત્રાવસ્થિતં પ્રજ્ઞાનં બ્રહ્મ, અતો મયિ અવસ્થિતં પ્રજ્ઞાનં બ્રહ્મ, પ્રજ્ઞાનત્વાવિશેષાત્ ઇતિ ઐતરેયમહાવાક્યોત્થિતજીવબ્રહ્મૈક્યજ્ઞાનસિદ્ધિઃ

નિરન્તરં ભૂયાત્ ॥ ૪૦ ॥

આત્મસન્નિધૌ વિદ્યમાનત્વેન, જડરૂપસ્યાપિ દેહેન્દ્રિયાદેઃ
ચેતનત્વેન ભાસમાનત્વાત્, આત્મા ચિદ્રૂપ ઇતિ ચિદાત્માનુભવસિદ્ધિઃ
સમ્યગ્ભૂયાત્ ॥૪૧॥

આત્મસહિતત્વેન, દુઃખાત્મકસ્ય દેહાદેરપિ પ્રિયતમત્વાત્,
આત્મા પરમાનન્દરૂપ ઇતિ, આનન્દાત્મનુભવસિદ્ધિઃ
સમ્યગ્ભૂયાત્ ॥ ૪૨ ॥

દેશતઃ, કાલતઃ, વસ્તુતઃ, પરિચ્છેદરહિતાદ્વિતીયાત્માનુભવસિદ્ધિઃ
સમ્યગ્ભૂયાત્ ॥ ૪૩ ॥

પૂર્વાપરપરામર્શમન્તરેણ સહસોત્પદ્યમાનસ્ય ક્રોધાદિવૃત્તિ-
વિશેષસ્ય હેતોઃ ચિત્તસંસ્કારસ્ય, વિવેકજન્યાયાં ક્ષાન્ત્યાદિવાસનાયાં
દૃઢાયાં સત્યાં વિનાશાત્, બાહ્યનિમિત્તાભાવેન ક્રોધાદ્યનુત્પત્તિઃ
સમ્યગ્ભૂયાત્ ॥ ૪૪ ॥

" યસ્ય પ્રસાદાદહમેવ વિષ્ણુઃ, મય્યેવ સકલં પરિકલ્પિતં
ચ " ઇતિ, આત્મસ્વરૂપં વિજાનામિ, તસ્ય પાદારવિન્દયોઃ
અચઞ્ચલા ભક્તિઃ નિરન્તરં સમ્યગ્ભૂયાત્ ॥ ૪૫ ॥

અચિદ્રૂપસ્ય જગતઃ ચિત્સન્નિધેર્વિદ્યમાનત્વાત્, ચિદ્રૂપાત્મા સર્વગત
ઇતિ સર્વગતાત્માનુભવસિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૪૬ ॥

સર્વાર્થસાધકત્વહેતુના, સર્વસંબન્ધેન ચ આત્મા પરિપૂર્ણ
ઇતિ પરિપૂર્ણાત્માનુભવઃ સમ્યગ્ભૂયાત્ ॥ ૪૭ ॥

દેશકાલાવ્યવહિતત્વેન પરોક્ષહેતોરભાવાત્, સાધનાન્તરનિરપેક્ષતયા
સ્વયંપ્રકાશમાનઃ ચિદાત્મા સર્વદા સ્વતસ્સિદ્ધાપરોક્ષ ઇતિ
અપરોક્ષાનુભવસિદ્ધિઃ સમ્યગ્ભૂયાત્ ॥ ૪૮ ॥

યત્ર યદ્વસ્તુ અસ્તીતિ ઈક્ષતે, તેન વસ્તુના અન્યત્ર અનન્વાગતત્વેન
આત્મા અસઙ્ગ ઇતિ, અસઙ્ગાત્માનુભવઃ સમ્યગ્ભૂયાત્ ॥ ૪૯ ॥

નિરવયત્વેન અસઙ્ગત્વેન ચ, આત્મનઃ કેનાપિ
સંબન્ધાભાવાત્, આત્મા નિત્યમુક્ત ઇતિ, નિત્યમુક્તસ્વરૂપાનુભવઃ
સમ્યગ્ભૂયાત્ ॥ ૫૦ ॥

અવેદ્યત્વે સતિ અપરોક્ષવ્યવહારયોગ્યત્વાત્, આત્મા સ્વયંપ્રકાશ
ઇતિ સ્વયંપ્રકાશાત્માનુભવઃ સમ્યગ્ભૂયાત્ ॥ ૫૧ ॥

સાધનાન્તરનિરપેક્ષતયા સ્વયમેવ ભાસમાનત્વાત્, આત્મા
સ્વયંપ્રકાશ ઇતિ સ્વયંપ્રકાશાત્માનુભવઃ સમ્યગ્ભૂયાત્ ॥ ૫૨ ॥

ઇદં સર્વં આત્મનિ પ્રતીયમાનં યત્ રૂપરસાદિકં જગત્ માયામયં,
ન ત્વેતત્ વસ્તુતોઽસ્તીતિ તત્ત્વનિશ્ચયો દૃઢીભૂયાત્ ॥ ૫૩ ॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજક શ્રીવિદ્યારણ્યસ્વામિરચિતઃ
બ્રહ્મવિદાશીર્વાદઃ સમ્પૂર્ણઃ ॥

Encoded by LakShmi Muthuswamy and
proofread by Sunder Hattangadi

*Brahmavid-Ashirvada*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*